समीक्षा

मञ्जुनाथग्रन्थावलिः प्रकाशिता

-गोविन्दचन्द्रपाण्डेयः

लोकप्रियसाहित्यग्रन्थमाला ८-मञ्जुनाथग्रन्थावलिः-प्रथमभागे प्रथमः खण्डः-जयपुरवैभवम्, गोविन्दवैभवम्,पृ.सं. ४५० मू.३२५/- प्रथमभागे द्वितीयखण्डः साहित्यवैभवम् पृ.सं. ५१०, मू. ३५५/- द्वयोः प्रधानसम्पादकः-प्रो.राधावल्लभत्रिपाठी, सम्पादकौ-देवर्षिकलानाथशास्त्री, डॉ. रमाकान्तपाण्डेयः, प्रका. राष्ट्रियसंस्कृतसंस्थानम्, ५६-५७, इंस्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली-५८

अधुनातन-संस्कृत-साहित्यस्य युगपुरुषत्वेन विख्यातानां, संस्कृतकाव्ये, गद्ये च नूतनविधानामुद्भावनं विधाय युगान्तरमुपस्थापितवतां, संस्कृतपत्रकारतायाः पुरोधसां कविशिरोमणिभट्टश्रीमथुरानाथशास्त्रिणां (''मञ्जुनाथो''पनाम बिभ्रतां)(१८८९-१९६४) साहित्यसृष्टिर्विपुला, विविधा चाऽस्तीति विदन्त्येव साहित्यमर्मज्ञाः।''साहित्यवैभवम्'', ''जयपुरवैभवम्'', ''गोविन्दवैभवम्'' इत्यादयो नूतनच्छन्दोबद्धाः काव्यग्रन्थाः, आदर्शरमणीत्यादय उपन्यासाः, ''किन्तोः कुटिलता'' इत्यादयो ललितनिबन्धाः, रसगङ्गाधर-कादम्बरीप्रभृतीनां श्रेण्यग्रन्थानां ससम्पादनं टीकालेखनम्, गाथासप्तशत्याः, हिन्दीकवेर्विहारिणः सप्तशत्याश्च समच्छन्दोनुवादः इत्येवंविधा विपुला साहित्यसृष्टिर्विंश्यां शताब्द्यां देशख्याताऽभूत्। अत एव साहित्येतिहासकारैराधुनिकसंस्कृतसाहित्यस्य युगविभाजनं कुर्वाणैः १९३०-१९६० मध्यगं युगं ''भट्टयुग'' त्वेनाऽभिहितमभूत् (पं. बलदेवोपाध्यायायस्य प्रधानसम्पादकत्वे प्रकाशितस्य संस्कृत वाङ्मय का बृहत् इतिहास इत्यस्य सप्तमे खण्डे)।

इदमपि साहित्यविमर्शकैः स्पष्टीकृतमभवद् यत् ''गजल'' गीतेरवतारणा उर्दूत इतरभाषासु सर्वप्रथमं संस्कृतेऽभूदित्याश्चर्यकरम्, तदनु हिन्दी-गुजराती-सिंधीप्रभृतिष्वन्यासु भारतीयभाषास्वभूत्, सेयमवतारणा च भट्टमञ्जुनाथेनाक्रियत। हिन्द्यां ललितनिबन्धाः परस्तात्प्रासरन् तत्पूर्वं संस्कृते ललितनिबन्धा व्यलेख्यन्त, भट्टपादास्तेषां स्रष्टारोऽभूवन्। भट्टमहोदयानां सेयं विविधा विपुला च साहित्यसृष्टिः प्रायो लक्षपृष्ठात्मिकाऽस्ति। एतस्या भूयानंशो दुर्लभः सञ्जातोऽभूत्, कतिपया रचनास्त्वलभ्या एव सञ्जाताः, तदानीन्तनानां पत्रिकाणामलभ्यत्वात्। एवंविधानां साहित्यसर्जकाणां समग्रं साहित्यं पाठकैरुपलभ्येत,

इत्येतदर्थं दिल्लीस्थेन राष्ट्रियसंस्कृतसंस्थानेनैतादृशानां विदुषां ग्रन्थावलीप्रकाशनस्योपक्रमः प्रारब्ध इति ज्ञात्वा प्रसीदेयुर्विद्वद्वर्याः। सर्वप्रथमं भट्टमथुरानाथशास्त्रिमञ्जुनाथानां ग्रन्थावलिरस्मिन् क्रमे प्रारभ्यते यस्याः खण्डद्वयं सपद्येव प्रकाशमागतम्।

सेयं ग्रन्थावलिर्विभिन्नेषु भागेषु च प्रकाश्येतेति योजना। एतस्यां प्रथमभागस्य काव्यकृतिस्वरूपस्येदं खण्डद्वयम्। प्रथमे खण्डे जयपुरवैभवं, गोविन्दवैभवं चेति काव्यद्वयं, कतिपयमुक्तकरचनाः, समस्यापूर्तयश्च समाविष्टाः। द्वितीये खण्डे ''साहित्यवैभवम्'' प्रकाशितम्। जयपुरवैभवे जयपुरनगरस्येतिहासः, राज्यवंशवर्णनं, नगरस्य स्थानोद्यानादीनां, विशिष्टव्यक्तीनां, विदुषां च वर्णनं कवित्त-दोहा-चौपाईप्रभृतिषु हिन्दीच्छन्दःसु, संस्कृतच्छन्दःसु च निबद्धमस्ति। गोविन्दवैभवे भक्तिकविता संस्कृत-हिन्दी-उर्दूप्रभृतिच्छन्दःसु गीतिषु चास्ति। द्वितीये भागे साहित्यवैभवाख्ये काव्यसंग्रहे नवरस-ऋतुवर्णन-नवयुगवर्णन-नायक-नायिकाभेदप्रभृतिविषयिणी कविता, अन्योक्तयः, बिहारिप्रभृतीनां कवीनां समच्छन्दोऽनुवादास्तु सन्त्येव, समस्तेषु संस्कृतच्छन्दःसु काव्यरचना, समस्तहिन्दीच्छन्दःसु संस्कृतकाव्यं, समस्तासु उर्दूगीतिविधासु लक्षणपरिचायनपूर्वकं संस्कृतकाव्यरचना इत्यादिकं विशिष्य चमत्कारजनकं प्रभावि च कृतिजातमपि समाविष्टम्।

एवंविधैरेव नवप्रयोगैस्तदानीं नवजागरणमानायितमभूत्, तत एव च भट्टमथुरानाथानां युगप्रवर्तकत्वमभिहितमितिहासकारैः। ग्रन्थावल्या अस्याः प्रधानसम्पादकास्तु राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिवर्याः प्रो.राधावल्लभत्रिपाठिनः सन्ति येषामयं प्रकल्पोऽस्ति, सम्पादकत्वं भट्टमथुरानाथशास्त्रितनूजैः स्वयं सुप्रथितविद्वद्वर्यैः कविभिः समालोचकैश्च राष्ट्रपतिसम्मानितैः देवर्षिकलानाथशास्त्रिभिरनुष्ठितम्। तैः स्वकीयभूमिकायां नवयुगीनसंस्कृतसाहित्यं परिचायितमस्ति, तदनु तैर्ग्रन्थकारस्य भट्टमथुरानाथ-शास्त्रिणो जीवनं कृतित्वं च सविस्तरं विवृतमस्ति। सहायकेन सम्पादकेन डॉ. रमाकान्तपाण्डेयेन भट्टपादानां टीकाग्रन्थानां परिचयः प्रत्तः। पूर्वमपि श्रीमता पाण्डेयेन भट्टमहोदयानां गद्यसाहित्यं सुसम्पाद्य प्रकाशितमभवत्।

ग्रन्थावल्यामस्यां मूलकाव्यैः सह स्वयं कविना निबद्धा संस्कृतटीकाऽपि मुद्रिता यया काव्यबोधने सुमहत् साहाय्यमनुष्ठीयते। हिन्दीटीकादिकं, यत् गीताप्रेसादिभिः पूर्वप्रकाशितेष्वेषु काव्येष्वभूत्, नाऽत्र समाविष्टम्, मूलग्रन्थकारस्य समस्तं साहित्यं सुरक्षिततया पाठकेभ्यः प्राप्येतेति सर्वात्मना प्रशंसनीयोऽयं प्रकल्पः। एतत्कृते संस्थानकुलपतयः सम्पादकद्वयं सर्वे च सहयोगिनः सुभृशं साधुवादार्हाः। नूनं संस्कृतपाठक-समुदाय एतेषां कार्तज्ञ्यं सर्वदा बिभृयादित्यत्र नास्ति संशीतिलेशः।